।। सौन्दर्यशास्त्रम् ।।
(काव्यसाहित्यदृष्ट्या सौन्दर्य विमर्शः)

प्रो० शिवजी उपाध्यायः

तत्रादौ वस्तुनिर्देशगर्भं मङ्गलपद्यपञ्चकम्—

यत्किञ्चिदद्वयमपि द्वयसन्निविष्टं
विश्वप्रपञ्चमरसं सरसं तनोति।
सत्यं शिवं श्रयदलौकिकसुन्दराख्यं
सौन्दर्यवन्निखिलनिर्वृतिकृन्नतोऽस्मि ।।**1**।।

स्वान्तानुशासनवशात् स्ववशीकृतायाः
सृष्टे विंशिष्टकमनीयगुणैक हेतु।
यच्छास्ति शंसति च संसृतिसंस्थितिं तत्
सौन्दर्यशास्त्रमतुलं सकलैरुपास्यम्।।**2**।।

लोकेषु लौकिकमलौकिकतां दधानं
श्रौतादिदर्शनपदेषु[1] सदेकमुक्तम्।
काव्येषु तत्सहृदयैरनुभूयमानं
सौन्दर्यमेव रसभावमयं विभाति।।**3**।।

व्यक्तीभवत् प्रतिपदं प्रविभज्यमानं
यद्देशकालमनुजस्थितिभेदभिन्नम् ।
आनन्त्यमादधदनिर्वचनीयरूपं
सौन्दर्यवत्सगुणवत्परमात्मभूतम् ।।**4**।।

शब्दार्थसाहितिचमत्कृति लक्षणेन
साहित्यशास्त्रपरिभाषितरम्यवस्तु ।
सौन्दर्य दर्शनमिदं सुकविप्रणीत
काव्याध्वनि ध्वनिनिदर्शनमूलमस्ति।।**5**।।

शब्दार्थयोर्यत्साहित्यं तच्च सौन्दर्यमन्तरा चमत्काराधायकं न भवतीति कृत्वा किं सौन्दर्यमिति जिज्ञासायां तल्लक्षणभूमिस्तावन्निरूप्यते—

---

1 ''एकं सद्विप्रा बहुधा वदन्ति'' इति श्रुत्युक्तेः ।

सुन्दरस्यैक   देशित्वाद्गुणत्वादुपचारत:।
सौन्दर्यं तत्र शब्दार्थसाहित्ये विनिवेश्यते।। **1** ।।

सुन्देरेति। सुन्दरस्य सौन्दर्यवत: पदार्थस्य चित्ताकर्षकस्य मनोरमस्य रमणीयस्य वस्तुनो वा, एकदेशित्वादेकांशे विद्यमानत्वात्तर्द्धमतया च गुणत्वाद्गुणरूपत्वाद प्रधानत्वाच्च, उपचारत आरोपितधर्मत:, सादृश्यातिशयेनाभेदेनोपचरित रूपत्वादित्यर्थ: । सौन्दर्य चमत्कारत्वापरपर्यायं सुन्दरत्वगुण रूपं तत्र सुप्रसिद्धे प्रक्रान्ते शब्दार्थसाहित्ये शब्दार्थयो: सहभावेन सम्पद्यमाने काव्यात्मके शब्दार्थसमसमुदय सम्पन्नस्वरूपे विनिवेश्यते विशेष निवेशविधिना सन्निधीयते। तत्र विशेषो रचनात्मकवर्णनाधर्मगत:, निवेशोऽत्र शब्दार्थसंघटनविधानात्मक:। कैरिति काव्यकृद्भि: काव्यतत्त्वविद्भिश्चेति शेष:। तेन च सुन्दरं चमत्कारवत्काव्य साहित्यं सम्पद्यते सौन्दर्य सन्निधानेनेति भाव:।

सुन्दरत्वेन यत्ख्यातं तदन्यद्वस्त्वसुन्दरम्।
तदेतदुभयं लोके, साहित्ये त्वन्यथा प्रथा।। **2** ।।

सुन्देरेति। सम्प्रति लोकगतं साहित्यगतञ्च सौन्दर्यं भिन्नमिति निदर्श्यते लोके यद्वस्तु सुन्दरत्वेन सौन्दर्य–वदात्मगुणेन ख्यातं ख्याति प्रसिद्धिमवाप्तलौकिकानां पदार्थानां मध्ये, तदन्यत: सौन्दर्यवतो वस्तुनो यदन्यद्वस्तु पृथग्भूतं सुन्दरवस्तु व्यतिरिक्तं निखिलं वस्तुजातमसुन्दरं सौन्दर्यगुणहीनं सुन्दरत्वच्युतमिति व्यवह्रियते। तदेतदुभयं तादृशोभयविधं सुन्दरत्वासुन्दरत्वात्मकं व्यवहारविधानं लोक्यमान धर्मवति लोक एव पर्यवसीयते, तस्य लोक व्यवहारमात्रपर्यवसितत्वात्। एतदतिरिक्तं साहित्ये शब्दार्थ सह भावसंवलितकाव्यात्मके जगति, त्विति लोकात्साहित्यव्यवच्छेदार्थम्। लोकादनाथा भिन्न भिन्न भावेन लोकव्यवहार व्यतिरिक्त विधिनेत्यर्थ:। प्रथा प्रथमानपरम्परा परिपाटी रूढिरिति यावत्। सौन्दर्यतत्त्व बोधविषयिका लोकस्थितिरन्या काव्य साहित्यादस्तीति शेष:।

वर्णा:पदानि वाक्यानि साहित्ये निखिलान्यपि।
संदृब्धानि प्रशस्यन्ते सौन्दर्यातिशयान्वयात्।। **3** ।।

वर्णा इति। वर्णा: कचटतपादय: वर्णसमाम्नाया: पदानि सुप्तिङन्तानि, एतानि निखिलान्यपि समस्तानि वर्ण पदवाक्यत्वविशिष्टानि शाब्दसन्दर्भोद्भावितानि कल्पितानि सन्निवेशितानि च प्रशस्यन्ते, प्रशस्तिं भजन्ते प्रशस्यमानहेतो:। सौन्दर्यस्य सौष्ठवस्य कमनीयकवनवैशिष्ट्यस्य योऽतिशय आधिक्यं प्रसर: प्राचुर्य साहित्यगतानि रमणीयान्येव विशिष्टान्त इति भाव:।

लोके सुन्दरत्वेनासुन्दरत्वेन वा ख्यातानि निखिलान्यपि वस्तूनि वर्णपदवाक्यतया काव्यसाहित्ये सन्निवेशितानि सौन्दर्यवन्ति भवन्तीत्यभिप्राय:।

सौन्दर्य सृष्टिसाराणां पदार्थानां निदर्शनम्।
साहित्यं सुचिरं नव्यं काव्यमालक्ष्य लक्ष्यते।। **4** ।।

सौन्दर्येति। सौन्दर्यसृष्टे: सुन्दरत्वगुणगुम्फितस्य सर्गस्य सौन्दर्य सम्भृताया रचनायाश्च साराणां तत्व भूतानां मूलोल्लासिरूपाणां वा पदार्थानां वस्तूनां वर्णपदभाजां निदर्शनं नि:शेषदृश्यभाजनं दृष्टान्तकरणं सामग्रन्थेणोदाहरणं च

साहित्यं शब्दार्थसहभावोद्भासितं तदाख्यं लोकोत्तरं सरसं वस्तु सुचिरं नव्यं सुष्ठु चिरन्तनं नवीनं सुन्दरं नित्यनवञ्चैतत् तादृशमेव लक्ष्यते निरूप्यते लक्ष्यतावच्छेदकतया प्रतिपाद्यते।

वस्तुतस्तु साहित्यं काव्यञ्चेत्युभयं पर्यायमात्रभिन्नं तत्त्वतोऽभिन्नं काव्यसाहित्यमित्यभिधानप्रतिष्ठं सचेतसां चेतोनिविष्टं तिष्ठतीति तात्पर्यमवसातव्यम्।

तादृक्सृष्टिविधातारो विधातृकृतसृष्टितः।
सम्भारानाददानास्ते विशिष्टान्ते ततोऽधिकम् ।। 5 ।।

तादृगिति। तादृक्तादृशोक्तप्रकारक सौन्दर्यसारसमवाय समवेतायाः, सृष्टेः सर्गस्य काव्यात्मकनिर्माणस्येति यावत्। विधातारो विधानेन कर्तारः काव्यौपयिकसामग्र्या निर्मातार इति भावः। विधात्रा ब्रह्मणा जगद्विधानकर्त्रा कृताया विहितायाः सृष्टिः सर्गतः सम्भारान्निर्माणानुकूलोपकरणपदार्थान्काव्यसृष्टिविधानोपयुक्त सौन्दर्य-वत्सामग्रीविशेषानित्यर्थः। आददाना संगृह्णन्तः स्वीकुर्वाणाश्च ते पूर्वोक्ता विष्वग्विश्वविश्रुता काव्यसृष्टिकर्तारः कवयः ततो विधातृकृतसृष्टितोऽधिकं सातिशयं यथा स्यात्तथा समनन्ततस्तोऽपेक्षयाऽऽतिशय्यं सन्दधाना विशिष्यन्ते वैशिष्ट्यमातन्वते विशेषानादधते नियतिकृतनियमराहित्येन लोकोत्तरत्वं भजन्ते ।

यदर्थं सस्पृहो लोको यदाप्तुं परमोत्सुकः।
यदाप्य परिभुज्यापि सोत्कण्ठस्तद्धि सुन्दरम्।। 6 ।।

यदिति। यद्वस्तु नित्यनवायमानमनुत्तमं लोकोत्तरं यद्, यस्यार्थं यस्य तादृशस्य कमनीयतमस्य वस्तुनः कृते लोको जनः प्राणिसमुदायः सस्पृहः साभिलाषः सविशेषमनवरतं समीहमानः। किञ्च यदाप्तुं यद्वस्तु विशिष्टमवाप्तुमधिगन्तुं वा परमोत्सुकः सातिशयमुत्कण्ठापरायणोऽत्यन्तमौत्सुक्यवान् भवतीति शेषः। यद्वस्तु तादृशमाप्याधिगम्य परिभुज्य परितो भुक्तिविषयीकृत्य निरन्तरमास्वाद्यमानतामानीय दर्शनरसनस्पर्शनादि विधया विशेषतः प्रतिक्षणमक्षि-लक्ष्यीकृत्यापि सोत्कण्ठ उत्कण्ठान्वितः सततमुत्कलिकोन्मुखो लोको भवति तद्, विशिष्टलक्षणलक्षितं वस्तु सुन्दरं सौन्दर्यवदुच्चैस्तरमनुत्तरम् सौन्दर्यगुणगरिमगरिष्ठमुच्यते। हीति ध्रौव्यार्थकम्।नैरन्तर्यम् नवीनं दृश्यश्रव्यसमीचीनं सुखास्पदं वस्तु लोकोत्तरं सुन्दरमित्युच्यते, तच्च काव्यात्मकमिति।

निर्गलद्रसनिर्व्यूढं गुणालङ्कारसञ्चितम्।
निर्दुष्टं भावभूयिष्ठं काव्यसाहित्यमेव तत्।। 7 ।।

निर्गलदिति। निःशेषेण गलन्निष्यन्दमानो यो रस्यते आस्वाद्यते रस्यमानतयाऽऽस्वादविषयीकृतो रस आस्वाद आह्लादजनकश्चमत्कृतिप्राणस्तेन निर्व्यूढं निःशेषतया परिक्लृप्तमनुस्यूतं परिप्लुतं वा। गुणैर्माधुर्या-दिभिरलङ्कारैनुप्रासोपमादिभिश्च सञ्चितं सम्यक्चितं व्याप्तं रसानुगुणतयोपस्कृतम्। निर्दुष्टं दोषरहितं नित्यच्युत संस्कृत्यादि दोष वर्जितम्। भावभूयिष्ठं भावैर्विभावानुभावव्यभिचारिसात्त्विकादिभिर्भूयिष्ठं भूम्ना परिनिष्ठितं भूयो भाव्यमानस्वभावभावितमित्यर्थः। काव्यसाहित्यमेव काव्यञ्च तत्साहित्यम्, कविकर्म काव्यं तस्य शब्दार्थसहभाव संवलितं साहित्यं वा। तदेवेत्येवकारोऽन्ययोगव्यवच्छेदकः। तादृशमेवोपर्युक्तं काव्यसाहित्याभिधं नित्यनवीनं वस्तु सुन्दरं भवतीति भावः।।

ममेदं न ममेदञ्च यावदेतादृशी मतिः।
तावत्स्वपरभावेन वस्तु भाति न सुन्दरम्।। 8 ।।

ममेति। इदं पुरो दृश्यमानं वस्तु, ममास्मत्सम्बन्धिमदर्थमुपयुज्यमानं वेति। इदञ्चैतत् तद्वैपरीत्येन न मम मत्सम्बन्धगतं मदर्थमुपसेव्यमानं वा नास्ति। चेति भिन्नसम्बन्धक्रमबोधकं बोध्यम्। यावद् यदवधि पर्यन्तममत्वावबोधिका बुद्धिर्भेदभावविनिविष्टा तिष्ठति, तावत् तदवधिककालान्तं भेदात्मकबुद्धिमत्समय इति यावत्स्वपरभावेन स्वमात्मीयं परञ्च परकीयमिति स्वपरे तयोर्भावेन स्वपरत्वेन हेतुना वस्तु परिमितस्वरूपं किमपि रमणीयमरमणीयं वा लौकिकमलौकिकं वा भोग्यमभोग्यं वा वस्तु पदार्थापरपर्यायं सुन्दरं सौन्दर्यवदभिन्नं न भाति, न भानविषयतामुपयाति प्रतीतिविषयी भवतीति।

तदेतत्परिहारेण साधारण्येन सर्वदृक्।
काव्यमेवेति साहित्ये सौन्दर्यं सम्प्रतिष्ठते।।**9**।।

तदिति। तत्तस्माद्धेतोरेतत्परिहारेणैतस्य ममत्वाममत्वरूपस्वपरभाव परित्यागेन अपरिमितस्वभावनेत्यथः। साधारण्येन साधारणभावेन सामान्येन विभावादिवस्तु साधारणीकरणात्मना व्यापारेण व्यङ्ग्यव्यञ्जकभावसम्बन्धेन सर्व दृक्सर्वत्र दृष्टिमत्सर्वसामान्यदर्शनं सर्वहृदयजनग्राह्यमिति भावः। तदेतादृशं काव्यमेव शब्दार्थसहभावभावितं दृश्यश्रव्यात्मकं रसगुणालङ्कारादि वैशिष्ट्यनिरूपितं कविकर्मैवेत्यवकारेण स्वेतरव्यतिरेको व्यज्यते। इत्यतो हेतोः साहित्ये काव्यसाहित्ये वर्णनात्मकशब्दार्थसमुदये साहित्यसन्दर्भे सौन्दर्यं सुन्दरत्वगुणो रमणीयभावः परमाह्लादजनकः सम्प्रतिष्ठेते, सम्यक्प्रतिष्ठामासादयति समन्तात्प्रतिष्ठितो भवतीति।

सौन्दर्याधायकं काव्यसाहित्यञ्चेत्प्रतिष्ठितम्।
तदन्यन्निखिलं शास्त्रं किमग्राह्यमसुन्दरम्?।।**10**।।

सौन्दर्येति। ननु सौन्दर्यस्य सुन्दरत्वगुणस्याधायकभासमन्ताराधारकं चेद्यदि काव्यञ्च तत्साहित्यं काव्यस्य साहित्यं वा प्रतिष्ठितं प्रतिष्ठामधिगतं प्रतिष्ठायां स्थिरीकृतं वा सौन्दर्यतत्त्वविद्भिः काव्यसाहित्यविद्भिरिति शेषः। ततश्च तस्मात्काव्यसाहित्यादन्यदितरत निखिलं वेदस्मृतिपुराणादिकं शासनाच्छास्त्रमित्यभिधीयमानं किमग्राह्यम्? किमु ग्रहणायोग्यम्? श्रवणमननाध्यानानर्हमनुपादेयमनावश्यकं वा? किं वा तस्मात्काव्यसाहित्यादतिरिक्तां सर्वं वेदादिशास्त्रं पौरुषेयापौरुषेयमसुन्दरम्? वा स्यादिति चेदुच्यते

नैतदुह्यं यतः शास्त्रोच्चयस्तत्त्व प्रमाणकः।
काव्यसाहित्यमेकान्तं सौन्दर्यज्ञानसाधकम्।।**11**।।

नैतदिति। एतत्काव्यसाहित्येतरदन्यन्निखिलं शास्त्रमग्राह्यमसुन्दरमिति नोह्यम् वितर्क्यं न शङ्क्यमिति भावः। यतश्च हेतोः शास्त्राणां वेदस्मृत्यागमपुराणप्रभृतीनामुच्चय उच्चयनादुच्चयः समूहः संग्रहो वा, तत्त्वं निगूढं रहस्यं पारमार्थिकं स्वरूपं वा प्रमाणयतीति तत्त्व प्रमाणकः परमात्मतत्त्वबोधकः, अध्यात्मदिगुन्मीलक आत्मानात्मभेदनिरूपको निःश्रेयससाधको वा निरूपितः परमतत्त्वदर्शिभिः शास्त्रकृद्भिरिति शेषः। काव्यसाहित्यं तु शब्दार्थसहभावसंवलितं सदेकान्तं कैवल्येनातिशयमात्यन्तिकमनिवार्यतया प्राधान्येन च सौन्दर्यज्ञानसाधकं सुन्दरत्वगुणवोध साधनभूतं सौन्दर्य तत्त्वनिरूपणात्प्रतिष्ठापितं काव्यसाहित्यमर्मवेदिभिः सुधीभिरिति।

अन्यच्चेत्थं समास्थेयं समग्रं सुन्दरं श्रुतम्।
काव्यसाहित्यमेवैतत्सौन्दर्यात्मकसृष्टिकृत् ।।**12**।।

अन्यदिति। अन्यत्तदतिरिक्तं समाधानं तत्त्वप्रमाणकं शास्त्रं सौन्दर्यज्ञान साधकं काव्यसाहित्य-भित्यतोऽन्यदुत्तरमेतादृशं समास्थेयं सम्यमाकलनीयं सम्यक्त्वेन मनस्यास्थाप्य समाधानान्तर प्रकारसूचकम्। यतश्च समग्रं सकलं श्रुतं श्रुत्यादि शास्त्रं सुन्दरं सौन्दर्यगुणान्वितम्, समुचितस्वनिहित तत्त्वार्थसार्थ प्रकाशन क्षमत्वादिति भाव:। परं येतत् प्रकरणप्रतिपाद्यं वर्ण्यविषयत्वेन निर्दिश्यमानमिदं काव्यसाहित्यमेव केवलं कविकर्तृकशब्दार्थ सहभावगुम्फितमनुत्तरं लोकोत्तरं सदेकं सौन्दर्यात्मक सृष्टिकृत्सौन्दर्यगुणवद्भुतमनोहारि विधानकारि परिकल्पितं पर्य-वस्थापितं वा पार्यन्तिक सौन्दर्यशास्त्रमर्मज्ञैरभिज्ञैरिति समाधेराशय:।

साहित्यं सर्वगं लोके शास्त्रे शब्दार्थवत्तया।
व्यञ्जकत्वाश्रयेणैतत्काव्य साहित्यमुच्यते।।**13**।।

साहित्यमिति। साहित्यं किल काव्यसाहित्बस्वरूपपर्यवसितं कथमिच्युते शब्दार्थसहभावभावितं साहित्यं खलु सर्व गच्छतीति सर्वगं सर्वसहृदयसामान्यं सार्वजनीनमाबालयुवस्थविरमाह्लादयितुमलं भवतीति शेष:।

तच्च तस्य सर्वगत्वं शब्दार्थवत्तया शब्दनाच्छब्दोऽर्थ्यमानतया चार्थस्तयो: सम्बन्धेन क्वचिच्छब्द प्रधानेन क्वचिदर्थ प्राधान्येन क्वचिच्चोभयसामान्येन लोक्यमाने लोके जगति शास्यमाने शास्त्रे श्रुत्यादौ चोभय संगच्छते। तदेतदेतादृशमुपर्युक्त प्रकारकं साहित्यं व्यञ्जनाव्यापार संयोगनिबन्धनेन वा काव्यसाहित्यं काव्यप्रधानं साहित्यं काव्यमयं तद्रूपंतदात्मकंवासाहित्यमुच्यतेऽभिधीयतेलक्षणलक्ष्यीक्रियतइति।

वस्तुतो दृष्टिभेदेन सुन्दरासुन्दरत्ववत्
विश्व विभजते भूयो नामरूपक्रियात्मकम्।।**14**।।

वस्त्विति। वस्तुतस्तत्त्वतो यथार्थतो वस्तुदृष्ट्या च दृष्टिभेदेन दर्शनक्रम भेदावबोधेन तत्तद्गुन्मेषविशेषनिमेषेण स्थूल दृशोपात्तभिदोद्बोधनेन वा सुन्दरत्वं सौन्दर्यगुणत्वमसुन्दरत्वं तदितरच्च तद्वत्तत्सम्बन्धानुबन्धीत्यर्थ:। तादृशदर्शनभेदोद्भूत सौन्दर्यासौन्दर्य योगानुयोगेनैतद् विश्वं विष्वग्भूतं विष्वग्व्याप्तं वा जगन्नामरूपक्रियात्मकं द्रव्यदृश्यव्यापारात्मकं तत्त्रिधा विभक्तं सद्भूयोभूयसाऽसंख्यभावेन विभजते, विभक्तिमापाद्यते, शतधा सहस्रधा वा विभागमुपगच्छतीति भाव:। भूय इत्युभयथा योज्यम्।

तच्च शब्दमयं सर्व नानार्थपरिकल्पितम्।
साहित्यं व्यक्तिमापन्नं सदेकान्तेन सुन्दरम्।।**15**।।

तदिति। तदिति प्रक्रान्तं नामरूपक्रियात्मकं विश्वम्। सर्व समस्तं शब्दमयं शब्दरूपं स्फोटात्मकशब्दात्मका-भिव्यक्तिस्वरूपत्वात्। अपि च नानार्थ परिकल्पितं परित: नानानेकविधैरर्थैर्वस्तुभिर्घटादिभि:कान्तादिभिर्वा परिकल्पितं परित: कल्पनोद्गतं सर्वतोभावेन स्मृतं स्मृतिविषयीकृतं बुद्धित्वाच्छिन्नतयाप्रकाशीकृत्यावबुद्धं वा साहित्यं शब्दार्थसहितं तदुभयपरिकल्पितञ्च व्यक्तिमभिव्यक्तिं वर्णनोपस्कृत्या प्रकाशपदवीमित्यर्थ:। आपन्नमधिगतम-भिव्यञ्जनयोपात्त सत्सत्यं सम्यक्साधु संस्कारसन्निविष्टं चैकान्तेनात्यन्तिकतया निरतिशयाह्लादसंवाद-सम्पादकत्वेनेत्याकाश:। तदेतादृशं रामणीयकसन्दर्भगर्भं साहित्यं सुन्दरं सौन्दर्यवद्गुणगरिमगरिष्ठं भवतीति शेष:।

वस्तुनि क्वचिदप्येतत्सौन्दर्यं सत्तिरोभवत्।
येनाविष्क्रियते तच्च साहित्यं कविकर्मजम्।।**16**।।

वस्तुनीति। क्वचिदपि कस्मिश्चिदपि लौकिकेऽलौकिके वा पदार्थे, एतन्निर्दिश्यमानमुपर्युक्तञ्च सौन्दर्य मसुन्दरत्वगुण: सद्विद्यमानमपि निगूढसूक्ष्मं वा वर्तमानं तिरोभवत् प्रत्यक्षतोऽदृश्यमानं नाक्षिलक्ष्यीक्रियमाणं चेदनाविष्कृतं तिष्ठति, तदा च येन कमनीयकारणेन रम्यमाध्यमेन वाऽविष्क्रियते, अभिव्यक्तिं नीयते, वर्ण नाविषयीकरणविधिना व्यक्तीक्रियते, तच्च तादृशं रमणीयवर्णनव्यापारवैशिष्ट्यविशेषितकविकर्मजं कवे: काव्यकर्तु: कर्म क्रियात्मकं काव्यमेव तस्माज्जातं कविक्रियात्मककाव्यसम्भूतं साहित्यं शब्दार्थ सहभावसमूहितं काव्यस्वरूपाभिन्नं तादात्म्योपेतं कान्तासम्मितं तद्धि साहित्यं सौन्दर्यतत्त्वाविष्कारकं मन्तव्यमिति भाव:।

परिणामतया सर्वं, सुन्दरं काव्यस तम्।
तदसङ्गतिकम् दृष्ट्या, दृश्यमानमसुन्दरम्।।**17**।।

परिणामेति। परिणामतया फलनिष्पत्त्या रसास्वादफलावाप्तिसम्पत्त्येति भाव:। काव्यसङ्गतं कविकर्म साङ्गत्यमवाप्तं काव्यसन्दर्भसयुक्तं काव्यवर्णनाविषयीकृतमित्यर्थ:। सर्वं सुन्दरमसुन्दरं वा लौकिकमलौकिकं वा चेतनमचेतनं वा यत्किमपि वस्तुजातं सुन्दरं सौन्दर्यगुणधर्मसन्निवेशविशेषपेशलं भवतीति शेष:। तद्वैपरीत्येन च तदसङ्गतिकं तेन काव्येन नास्ति सति संयोग: साक्षात्सम्बन्ध इति तदसयोगजं, किञ्च दृष्ट्या स्थूलदर्शनेन चर्मचक्षुषा च दृश्यमानं निर्वर्ण्यमानं स्थूलदृष्टि सृष्टिविषयीकृत्यावलोक्यमानं सर्वामित्युभयथा योज्यम्। समग्रं संसारिकं वस्तुजातमसुन्दरं सौन्दर्यगुणहीनं भवतीति शेष:। यद्यत्काव्यसङ्गतं तत्रत्सुन्दरं, यन्न यथा तदसुन्दरमिति भाव:।

अनादिनिधन: साक्षात्परमात्मा कवीश्वर:।
विश्वरूपमिदं काव्यं प्रणीतं चिरसुन्दरम्।।**18**।।

अनादीति। नादौ निधनं विनाशो यस्य स:, अनादिनिधन: शाश्वतनित्यसत्यात्मक:, सर्व शक्तिमदनन्तब्रह्माण्डनियामक:, साक्षादव्यवहितस्वरूपेण परोक्षापरोक्षोभयविधप्रविधानमूलहेतुकत्वेनेत्यर्थ:। परमात्मा परात्परतरो विभु: परमश्चासावात्मा सर्वात्मस्वरूपो जगन्नियन्ता कवीश्वर: कवीनामीश्वर ईशिता कविश्चासावीश्वर: कवीन्द्र: कविस्रष्टेत्युच्यते "कविर्मनीषी परिभू: स्वयम्भू:" इति श्रुत्युक्ते"। इदञ्च पुरो दृश्यमानं नामरूपकियात्मकं विश्वरूपं जगदात्मकं काव्यं परमात्मकविकर्म: प्रणीतं प्रकर्षेणोन्नीतं प्रणयनपाटव वैशिष्ट्येन संसृष्टं परमात्मना सता, चिरसुन्दरं नित्यमनोरमं सौन्दर्यगुणोत्कृष्टं प्रतिभातीति शेष:।

तत्र साहित्यसावप्रकाशनपरायणा:।
सौन्दर्यं संविचिन्वन्त: कवयन्तश्च केऽपिते।।**19**।।

तत्रेति। तत्र परमात्मप्रणीते चिरसुन्दरे विश्वरूपेऽस्मिन्काव्ये साहित्यस्य शब्दार्थसावसमुदितस्य काव्यात्मकस्येत्ययेः।ये सद्भावा: सम्यग्गुम्फिता: सत्त्वेन निरूपिता वा विभावादयो भावरूपा: काव्यविषयीकृतास्तेषां प्रकाशनं काव्याभिव्यक्तीकरणं वर्णनप्रकर्षेण प्रत्यक्षत्वापादनं वा तदेव परमुत्कृष्टमेकमात्रमयनं स्थानं परमाराधनं येषां ते, अथवा साहित्येन सावस्य स्नेहसौख्यसौहार्द सौमनस्यसामाञ्जस्यादि सामाञ्जस्यादिसुष्ठुसृष्टे: प्रकाशनं प्रसारणेऽभिव्यञ्जने वा परायणा: सततसंलग्ना ये तादृशा: केऽपि लोकोत्तरा वाग्विषया: विचक्षणास्ते विश्रुता: वाल्मीकिव्यासकालिदासादय: कवय: कवयितार: काव्यकरणकुशला: सौन्दर्यं वस्तुगतं सुन्दरत्वगुणं विश्वकाव्यानुगतं लौकिकमलौकिकं वा सम्विचिन्वन्त: सम्यक्परिशीलयन्तोऽनुसन्दधाना: कवयन्त: काव्यं कुर्वन्त: काव्यकर्ममर्म प्रकाशयन्त: सन्तीति शेष:।

सौन्दर्यं भावनारूपं साचेयं भाव्यते हृदा।
तेन तन्निष्ठता तस्य रूपादौ तूपचर्यते।।20।।

सौन्दर्यमिति। सौन्दर्यं सुन्दरत्वगुणश्च भावनारूपं भाव्यते भावतोऽनुभूयतेऽनयेति भावना वासना संस्कारविशेष:,तादृशं भावनात्मकं वासनारूपसंस्कारनिष्ठं सौन्दर्यमित्युक्तम्। साङ्गेयं सौन्दर्योद्भावनमरा भावनात्मकहृदा चेतसा चैतन्यप्रकाशितेन मनसा भाव्यते भावविषयीक्रियतेऽनुभूयते चित्तेन साक्षात्क्रियते वा। तेन हृदा भाव्यमानेन हेतुना तस्य सौन्दर्यस्य तन्निष्ठताभावनाविषयता हद्गतवासनाविनिष्टतेत्यर्थ:। तदेतादृशं भावनागतं सौन्दर्य रूपादौ रूपरसगन्धस्पर्शादिविषयेषु स्थूलाकारेषु त्वित्व्वस्तवार्थे। उपचर्यते उपचरित आरोपितव्यवहारतो व्यवसीयते। उपचरितक्रियया व्यवह्रियते,न तु वस्तुतोऽध्यवसीयते। रूपस्य रूपत्वं रसस्य माधुर्य गन्धस्याघ्राणं स्पर्श स्य स्पर्शनं सुन्दरमित्यारोपित व्यवहारो न तु वास्तविक इति भाव:।

भावना वासनाऽऽख्याता सा च संस्कारसंस्कृता।
हृन्मनश्चात्मसंयोगात्तदधिष्ठानामिष्यते ।।21।।

भावनेति। भावना भाव्यमानस्वरूपा व्यापारविशेष: क्रियात्मिकेत्यर्थ:। सा च भावना, संस्कारेण सम्यक्करणव्यापारेण सम्यगाधानानुसन्धानादि कर्मसहकृतपरिष्कारेणेत्यर्थ:। संस्कृता संस्कारमापादिता सम्यक्परिष्कृता च वासना वसनानुकूलक्रियात्मिका बीजरूपेण प्राक्तनेदानीन्तनजननोपात्ता भावानुगताऽभिव्यक्ति-ग्राह्यरूपाऽऽख्याता समन्तात् ख्यातिमागता प्रसिद्धिमिता तत्तच्छास्त्रेषु शास्त्रकृद्भिरिति शेष:।[1] हृदिति मनो मननात्मकमित्युच्यते। चेति तदुभयानुकर्षकम्। तदेव हृद्रूपं मनआत्मसंयोगादात्मनश्चिदात्मकस्य चैतन्य-प्रकाशरूपात्मकस्य विभो: सम्बन्धात्तदधिष्ठानं तस्या वासनापुरपर्याया भावनाया अधिकृता वासभूमिरिष्यते स्वीक्रियते तत्त्वज्ञैरिति शेष:।

ततो यन्मनुते सम्यङ्मनसा संस्कृतेन तत्।
सुन्दरं भाति लोकेऽस्मिन्तत्परं स्यादता दृशम्।।22।।

तत इति। मतश्च भाव्यमानरूपा भावना या आत्मसंयोगान्मनोऽधिष्ठानं ततो हेतो र्यद्वस्तु किमपि लौकिकं लोकोत्तरं वा संस्कृतेन संस्कारसंवलितेन सम्यक्परिष्कृतेन मनसा हृदा मननधर्मिणा सता सम्यक्सुष्ठु साधु समीचिनं वा मनुते मननाकूलतया स्वीकुरुते मननादङ्गीकृतं लोकेऽस्मिन् जगत्यामस्यां सुन्दरं रमणीयं सौन्दर्यगुणोत्कृष्टं भाति सम्मानविषयी भवति, प्रतीतिपथमवतरतीत्यर्थ:। अर्थात्यत्र मनो रमतं, तद्रमणीयमिति भाव:। तत्परं तस्मान्मनो मननानुकूलव्यापारात्परमन्यदतादृशं तादृशसुन्दरत्वगुणहीनमसुन्दरं वा स्यादभवेत्। यन्मनोतिरिक्तं तदसुन्दरमित्याशय:। "यन्मनसा नमनुते" इति श्रुतिस्वारस्यात्।

काव्यसाहित्यसंस्काराच्चेतसैतत्सचेतस: ।
सर्वं सौन्दर्यसंपृक्तं मन्वते सचराचरम्।।23।।

1–हृद्यपि हृष्यति ह्लादमुपगच्छतीति हृद्हृदयम्, मनुते माम्मठे वेति ममश्चेत:, ह्लादनादहृन्मननान्मना इत्युभयोर्भेद: पर्यवसेय:।

काव्यैति। काव्यं कविकर्म तच्च कविकर्मानुकूला कृति:, तत्कृतं तद्रूपं तत्सम्बन्धि वा साहित्यं शब्दार्थ समप्राधान्यनिरूपितं तस्मै तादृशस्य काव्योन्मीलित कमनीयशब्दार्थसमुदायसन्दर्भस्य संस्कारात्सम्यक् परिष्काराज्जन्मान्तरेदानीन्तनवासनोन्मेषाद्धेतो: सचेतस: समानं साधारणीकृतं सम्वादसहकृतं चेतो येषां ते तथाभूता: सहृदया: काव्यसाहित्यतत्त्वविद:, चेतसा चेतनधर्मवता चिदुन्मुखेन मनसा एतत्पुरोदृश्यमानं मनोबुद्धिचक्षुर्योगेन साक्षात्क्रियमाणमित्यर्थ:। सर्वं लौकिकमलौकिकं वस्तुजातमयं स चराचरं चेतनाचेतनात्मकं चरेण गतिमताऽचरेणागतिकेन सहितं जड़चेतनमयमित्यर्थ:। तदेतादृशं जगत् सौन्दर्यसम्पृक्तं सुन्दरत्वगुणान्वितं मन्वते स्वीकुर्वते पश्यन्ति स्वानुभवगोचरी कुर्वन्तीति भाव:।

साहित्यं किञ्च सौन्दर्यं द्वयमन्योन्यपूरकम्।
एकमन्यद्विना नैव प्रतिष्ठां लभतेतराम्।।**24**।।

साहित्यमिति। साहित्यं सौष्ठवेन समुचितशब्दार्थसहभवभावितं काव्यात्मकं सत्। किञ्चेत्युभयानुक्रमबोधेनार्थम्। सौन्दर्यं सुन्दरैकदेशित्वात्सुन्दरत्वगुण:, द्वयमुभयं साहित्यं सौन्दर्यञ्चेति, अन्योन्यपूरकमन्यदन्यदित्यन्योन्यं पूरयति पूर्णं करोतीति पूरकं परस्परोकारकत्वेन साहायकमुन्नायकमिति यावत्। एकमिति साहित्यं सौन्दर्यं वा अन्यस्मात् पृथग्भूतसहायकमनुकृतं वा अन्यद् बिना साहित्यं सौन्दर्यमन्तरा सौन्दर्यञ्चसाहित्यमन्तरो प्रतिष्ठां प्रकृष्टस्थितिमुच्चतमसम्मानभूमिं नैव लभते तरां ध्रुवमेव न प्राप्नोति, अर्थात्साहित्योपस्कृतं सौन्दर्यं सौन्दर्यानुप्राणितं साहित्यं च लोकेऽस्मिन् प्रतिष्ठामाप्नोतीति भाव:।

साहित्य पूर्वकत्वाच्च सौन्दर्यस्थितिमश्नुते।
द्वयोस्तत्परमं लक्ष्यं तत्त्वमेकं रसात्मकम्।।**25**।।

साहित्येति। साहित्यं शब्दार्थमयं पूर्वं प्रथमोपात्तं तत्साहित्यपूर्वकम् तस्य भावतस्मात् प्रथमोपात्तसाहित्य संयोगादिति भाव:। सौन्दर्यं सुन्दरत्वगुण: स्थितिमस्तित्वं प्रतिष्ठां वाऽश्नुतेऽवाप्नोत्यधिगच्छति वा। यद्यपि साहित्यं सौन्दर्यं चेत्युभयमन्योन्यपूरकं परं सौन्दर्याधारभूतत्वात् साहित्यस्य पूर्वोपादानमिति भाव:। द्वयो: साहित्यसौन्दर्ययो परस्परोपकार्योपकारकभावेन संयुक्तयोराधाराधेयभावेन मिलितयोर्वा तत्सुप्रसिद्धं परममुत्कृष्टं परमार्थ स्वरूपम्चैकमद्वितीयमेकत्वावाच्छिन्नं रसात्मकं रस एव आत्मा स्वरूपं यस्य तद्रस्यमानस्वरूपम्। ''रसो वै स: '' इति श्रुत्युक्ते:। तत्त्वं तत्पदवाच्यं तद्भावरूपमाध्यात्मिकं निगूढं रहस्यं लक्ष्यं लक्षणीयं चरमस्थानमस्तीति भाव:। ''एकमेवाद्वयं ब्रह्म तत्पदेनावबोध्यते'' इति वेदान्तदर्शनोक्ते:। इत्युक्तं विषयविस्तरेण ।

पार्यन्तिकञ्च तद् यथा— सौन्दर्यशास्त्रमसकृत्परिशील्यमानं
नूनं नवं नवमिवातनुते विशेषम्। 'स्वरूपम्' पाठान्तरं
निर्विश्य निर्विषयनिष्कलनिर्विशेष
चिन्मात्रमत्र परतत्त्वमिदं विभाव्यम्।।